गच्छतीत्यादौ न चैत्रे संख्यान्वयः। यत्र कर्म्मादौ न विशेषणत्वतात्पर्य्यं तद्वारणाय प्रथमान्तेति। यद्वा धात्वर्थातिरिक्ताविशेषणत्वं प्रथमदलार्थः तेन चैत्र इव गच्छतीत्यत्र चैत्रादेर्व्वारणं स्तोकं पचतीत्यादौ स्तोकादेर्व्वारणाय च द्वितीयदलम्। तस्य द्वितीयान्तोपस्थाप्यत्वाद्वारणम्। एवं व्यापारेऽपि न शक्तिर्गौरवात्। रथो गच्छति इत्यादौ तु स्वव्यापारे आश्रयत्वे वा लक्षणा। जानाति इत्यादौ तु आश्रयत्वे नश्यतीत्यादौ प्रतियोगित्वे निरूढ़लक्षणा। उपमानाद्यथा शक्तिग्रहस्तथोक्तम्॥ * । एवं कोषादपि शक्तिग्रहः सति बाधके क्वचित्त्यज्यते यथा नीलादिपदानां नीलरूपादौ नीलादिविशिष्टे च शक्तिः कोषे व्युत्पादिता तथापि लाघवात् नीलादौ शक्तिः नीलादिविशिष्टे लक्षणेति॥ * ॥ एवमाप्तवाक्यादपि। यथा, कोकिलः पिकपदवाच्यः इत्यादिशब्दात् पिकादिशक्तिग्रहः॥ * ॥ एवं व्यवहारादपि। यथा, प्रयोजकवृद्धेन घटमानयेत्युक्तं तत् श्रुत्वा प्रयोज्यवृद्धेन घट आनीतस्तदवधार्य्य पार्श्वस्थो बालो घटानयनरूपं कार्य्यम्। घटमानय इति शब्दप्रयोज्यं अवधारयति ततश्च घटमपसारय गामानय इत्यादौ आवापोद्वापाभ्यां घटादिपदानां कार्य्यान्वितघटादौ शक्तिं गृह्णाति॥ * ॥ एवं वाक्यशेषादपि शक्तिग्रहः। यथा यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशूकविशिष्टे आर्य्याणां प्रयोगः कङ्गौ च म्लेच्छानाम्। तत्र हि यथान्या ओषधयो म्लायन्ते तथैते मोदमाना इवोत्तिष्ठन्ति॥

"वसन्ते सर्व्वशस्यानां जायते पत्रशातनम्।
मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः॥"

इति वाक्यशेषात् दीर्घशूके शक्तिर्निर्णीयते कङ्गौ तु शक्तिभ्रमात् प्रयोगः। नानाशक्तिकल्पने गौरवात्। हरिपदादौ तु विनिगमकाभावान्नानाशक्तिकल्पनम्॥ * ॥ एवं विवरणादपि शक्तिग्रहः। विवरणन्तु तत्समानार्थपदान्तरेण तदर्थकथनम्। यथा घटोऽस्ति इत्यस्य कलसोऽस्तीत्यनेन विवरणाद्घटपदस्य कलसे शक्तिग्रहः। एवं पचति इत्यस्य पाकं करोति इत्यनेन विवरणादाख्यातस्य यत्नार्थकत्वं कल्प्यते॥ * ॥ एवं प्रसिद्धपदसान्निध्यादपि शक्तिग्रहः। यथा। इह सहकारतरौ मधुरं पिको रौति इत्यादौ पिकपदस्य शक्तिग्रह इति। तत्र जातावेव शक्तिर्न तु व्यक्तौ व्यभिचारादानन्त्याच्च॥ * ॥ शक्तं पदन्तु क्वचिद्यौगिकं क्वचिद्रूढं क्वचिद्योगरूढ़ं क्वचिद्यौगिकरूढ़म्। यत्रावयवार्थ एव बुध्यते तद्यौगिकं यथा पाचकादिपदम्। यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुध्यते तद्रूढ़ं यथा गोमण्डपादि पदम्। यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढं यथा पङ्कजादिपदम्। तथा हि पङ्कजपदमवयवशक्त्या पङ्कजनिकर्त्तृरूपमर्थं बोधयति समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति। यत्र अवयवार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधस्तद्यौगिकरूढ़ं यथोद्भिदादिपदम्। तत्र हि ऊर्द्ध्वभेदनकर्त्ता तरुगुल्मादिरपि बुध्यते। इति सिद्धान्तमुक्तावली॥

शाब्दिकः, पुं, (शब्दं करोतीति। शब्द+"शब्ददर्द्दुरं करोति।" ४।४।३४। इति ठक्।) शब्दशास्त्रवेत्ता। वैयाकरणः। आदिशाब्दिका यथा,—

"इन्द्रश्चन्द्रः काशकृत्स्ना पिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥"
इति कविकल्पद्रुमः॥

नव्यशाब्दिका यथा। क्रमदीश्वरः। सर्व्ववर्म्मा। पद्मनाभमिश्रः। वोपदेवः। सतुसर्व्वानन्दः। भरतमल्लिकप्रभृतयः॥ शब्दसम्बन्धिनि, त्रि॥

शाम, [न्] क्ली, साम। इत्यमरटीकासारसुन्दरी॥

शामनं, क्ली, (शमनमेव। स्वार्थे अण्।) मारणम्। शान्तिः। इति केचित्॥

शामनः, पुं, (शमन एव। प्रज्ञाद्यण्।) शमनः। इति पुराणम्॥

शामनी, स्त्री, (शमनस्य यमस्येयमिति। शमन+अण्। ङीप्।) दक्षिणा दिक्। इति राजनिर्घण्टः॥

शामित्रं, क्ली, यज्ञम्। पशुबन्धनम्। यज्ञपात्रम्। इति केचित्॥ (शमितुरिदम्। शमितृ+अण्। पशुहिंसनम्। यथा, भागवते। १।१६।८।

"इहोपहूतो भगवान् मृत्युः शामित्रकर्म्मणि।
न कश्चिन्म्रियते तावद् यावदास्ते इहान्तकः॥")

शामीलं, क्ली, (शम्याः विकारः। "शम्याष्ट्लञ्।" ४।३।१४२। इति ट्लञ्।) भस्म। इति सिद्धान्तकौमुदी॥

शामीली, स्त्री, स्रुक्। इति सिद्धान्तकौमुदी॥

शाम्बरी, स्त्री, शम्बरदैत्यनिर्म्मितमाया। इन्द्रजालादिमाया। इत्यमरभरतौ॥

शाम्बविकः, पुं, शाङ्खिकः। इति जटाधरः॥

शाम्बुकः, पुं, शम्बूकः। इति शब्दरत्नावली॥ शामुक इति भाषा॥

शाम्बूकः, पुं, शम्बुकः। इत्यमरटीकायां भरतः॥

शाम्भवं, क्ली, (शम्भोरुपवेशाय इदम्। अण्।) देवदारु। इति राजनिर्घण्टः॥

शाम्भवः, पुं, कर्पूरः। शिवमल्ली। गुग्गुलुः। इति राजनिर्घण्टः॥ विषभेदः। इति शब्दचन्द्रिका॥ शम्भुपुत्त्रः। शम्भुपूजकः। शम्भुसम्बन्धिनि, त्रि॥ (यथा, कथासरित्सागरे। १२। १६७।

"तत्र च प्रविशन्त्यग्रे बहवः शाम्भवा गणाः॥")

शाम्भवी, स्त्री, नीलदूर्व्वा। इति राजनिर्घण्टः॥ दुर्गा। यथा,—

"शाम्भवी देवमाता च चिन्ता रत्नप्रिया सदा॥"
इति तन्त्रसारे दुर्गाशतस्तोत्रम्॥

शायकः, पुं, (शाययति शत्रून्। शी+णिच्+ण्वुल्। यद्वा, शेते तूणीरे इति। शी+ण्वुल्।) बाणः। इति जटाधरः॥ (यथा, नैषधचरिते। ४।१०१।

"प्रियसखीनिवहेन सहाथ सा
व्यरचयद्गिरमर्द्धसमस्यया।
हृदयमर्म्मणि मन्मथशायकैः
क्षततमा बहु भाषितुमक्षमा॥")

खड्गः। इत्यमरटीकायां स्वामी॥

शार, त् क दौर्ब्बल्ये। इति कविकल्पद्रुमः। (अदन्त-चुरा०-पर०-अक०-सेट्।) अशशारत्। इति दुर्गादासः॥

शारं, त्रि, (शॄ+घञ्।) कर्व्वुरवर्णः। इत्यमरः॥

शारः, पुं, (शीर्य्यतेऽनेन शृणाति वा। शॄ+"शॄ वायुवर्णनिवृत्तेषु।" ३।३।२१। इत्यस्य वार्त्तिकोक्त्या घञ्।) वायुः। इत्यमरः॥ अक्षोपकरणम्। इति मेदिनी॥ हिंसनम्। कर्व्वुरवर्णः कुशे, स्त्री। इति केचित्॥

शारङ्गः, पुं, (शीर्य्यते आतपैः। शॄ+"तरत्यादिभ्यश्च।" उणा० १।११८। इति अङ्गच्।) चातकः। (यथा,—

"अष्टौ मासान् जलधर तवापेक्षया शुष्ककण्ठः
शारङ्गोऽहं निरवधिवनानिनायाति क्षतत्वात्।
आस्तां तावत् सलिलकणिकालाभसम्भावनापि
वर्षारम्भप्रथमसमये दारुणो वज्रपातः॥"
इत्युद्भटः॥)

हरिणः। (यथा, शाकुन्तले। १।

"एष राजेव दुष्मन्तः शारङ्गेनातिरंहसा॥")

हस्ती। भृङ्गः। मयूरः। कर्व्वुरवर्णविशिष्टे, त्रि। इत्यमरटीकायां मुकुटादयः॥

शारङ्गी, स्त्री, (शारङ्ग+ङीष्।) वाद्ययन्त्रविशेषः। इति शब्दरत्नावली॥

शारदं, क्ली, (शरदि भवम्। शरद्+"सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।" ४।३।१६। इति अण्।) श्वेतकमलम्। इति राजनिर्घण्टः॥ (यथा, महाभारते। २।६१।३४।

"शारदोत्पलपत्राक्ष्या शारदोत्पलगन्धया।
शारदोत्पलसेविन्या रूपेण श्रीसमानया॥")

शस्यम्। इति मेदिनीशब्दरत्नावल्यौ॥

शारदः, पुं, (शरद्+अण्।) काशः। वकुलः। हरिन्मुद्गः इति राजनिर्घण्टः॥ वत्सरः। इति मेदिनी॥ पीतमुद्गः। इति हेमचन्द्रः॥ रोगः। इति सिद्धान्तकौमुदी -

शारदः, त्रि, (शरदि भवः। शरद्+अण्।) शरज्जातः। (यथा, मनौ। ६।११।

"वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः॥")

नूतनः। अप्रतिभः। इति मेदिनी॥ शालीनः। इति विश्वः॥

शारदा, स्त्री, सरस्वती। इति त्रिकाण्डशेषः॥ (यथा, महिम्नस्तोत्रे।

"लिखति यदि गृहीत्वा शारदा सर्व्वकालम्॥")

दुर्गा। (यथा, भागवते। १०।२।१२॥